१ श्रीगणेशायनमः॥ विघ्नेशजनकंशैलनंदनानंदकंदकं॥ सर्वेश्वरंशि
वंनत्वाटीकेयंलिख्यतेमुदे॥१॥ प्रस्फुरन्मधुपचुंबितपद्मापंकजातजनि
पंकजिनीयं॥ बुध्यतेकिलजडोपिचयस्मात्सारुणंतदिहछंदमनामः॥२॥
श्रीगुरूनूपितश्चोपिनत्वाभास्करशर्मणा॥ वृत्तरत्नाकरेसेतुर्यथामतिवि
रच्यते॥३॥ ग्रंथारंभेयमभिधेयमधिकृत्यप्रवर्त्ततेतत्रयोजनाभिधेयोत्त
रोक्तेः॥ संप्रयोजनंश्रीवल्लभाख्यंनामरूपंमंगलंनिबध्नन्ग्रंथस्यसंबंधप्रयो
जनेश्लोकत्रयेणाह॥ सुखसंतानसिध्यर्थंनत्वाब्रह्माच्युतार्चितं॥ गौरी
विनायकोपेतंशंकरंलोकशंकरं॥१॥ वेदार्थश्चोक्तशास्त्रेभ्यःपद्येकोभूद्वि
जोत्तमः॥ तस्यपुत्रोस्तिकेदारःश्रीवपादार्चनेरतः॥२॥ तेनेदंक्रियतेछंदो
लक्ष्यलक्षणसंयुतं॥ वृत्तरत्नाकरंनामबालानांसुखसिद्धये॥३॥ सुखसं
तानेति॥ सुखंनिर्विघ्नंग्रंथसमाप्तिजन्यंचिंतामणिरीत्याविघ्नध्वंसजन्य
वातस्यसंतानंपरंपरातस्सिध्यर्थंशंकरंनत्वेतिसंबंधः॥ एवंचसुखंब्र

१

ह्मानंदःसंतानंपुत्रपौत्रादितयोःसिद्धिरितिसुखलक्षणव्याख्यानंप्रकृतानुपयो
गादुपेक्ष्यं॥ अत्रश्लोकेयमकंनाम्नालंकारः॥ शंकरंनाम्नःस्मृतेः॥ यदुक्तं
अर्थेसत्यर्थभिन्नानांनाम्नांसापुनःश्रुतिःयमकमिति॥१॥ वेदार्थेति॥
वेदार्थश्चेतिनोक्तशास्त्राणिचेतिद्वंद्वः॥ द्विजोत्तमइतिद्विजेषूत्तमइतिविग्र
हः॥ लक्ष्येति॥ लक्ष्यंचलक्षणंचेतिविग्रहःद्वंद्वः॥ ताभ्यांसंयुतंयुक्तं॥ यद्यपि
मूलेलक्ष्यलक्षणयोरभिन्नत्वादत्रद्वंद्वोनयुक्तइतिसुधायामुक्तंतथा
पदार्थयोरभेदेपिपदार्थतावच्छेदकभेदाद्द्वंद्वस्यप्रामाणिकत्वमेवसाधु
बकुलोदरीनात्॥ यद्वालक्ष्यंचतल्लक्षणंचेतिकर्मधारयोस्तु॥ ईदृशंवृत्त
रत्नाकरंनामछंदःछंदःप्रतिपादकोग्रंथःक्रियतइत्यर्थः॥३॥ अथसंज्ञातेऽ
प्राप्तेयंसंज्ञानिरस्यति॥ पिंगलादिभिराचार्यैर्यदुक्तंलौकिकंद्विधा॥ मा
त्रावर्णविभागेनछंदस्तदिहकथ्यते॥४॥ पिंगलादिभिरिति॥ पिंगलः
सूत्रकारःआदिनाभाष्यकारादयः॥ लौकिकमिति॥ तेनचातुर्वर्ण्यस्या

त्राधिकारइतिभावः॥अत्रहलायुधेदंनिदर्शनंयथा॥छंदस्त्रिविधं॥गणयमा
त्रावर्णभेदात्॥अत्रायमार्यादि॥द्वितीयंवैतालीयादि॥तृतीयंसमान्यादीत्या
हुस्तत्र॥गणछंदसोमात्राछंदस्येवांतर्भावादिहात्रयेणाह॥द्विधेति॥मा
त्राछंदआर्यादिवर्णछंदःश्रीप्रभृति॥एतेनमात्राछंदोगणछंदइतिद्विधावि
भागोपिनिरस्तः॥४॥षडध्यायनिबद्धस्यछंदोस्यपरिस्फुटं॥प्रमाणमेवं
पिंगेनद्वाभ्यांसूत्रशतेनतु॥५॥षडध्यायेति॥सूत्रमिति॥ग्रंथगणना
यांप्रसिद्धानामनुष्टुप्छंदसांश्लोकानामितिशेषः॥एतेनसंभावितान्यक
र्तृकछंदोंतरप्रक्षेपोनिरस्तः॥५॥अथद्वितीयाध्यायगतवक्ष्यमा
णलक्षणोपजीव्याःसंज्ञाःउद्दिशति॥म्यरस्तजभनैर्लं
तैरेभिर्दशभिरक्षरैः॥समस्तंवाङ्मयंव्याप्तंत्रैलोक्यमिवविष्णुना॥६॥मू
य्रःसःतःजःभःनःमःलःइतिद्वौतारकेकाक्षराःसंज्ञाः॥श्रीस्त्रीमिस्ता
दिसूत्रानुसारतः॥अकोरेश्चारणंतुक्वचित्॥मयरसतजभनलगस
मितमिस्तादावित्येमुरवोच्चारणार्थमितिभावः॥आसांसंज्ञानामीदृशाक्ष

मेबीजंतुषष्ठेवक्ष्यामः॥समस्तमितिसंस्कृतप्राकृताद्यात्मकमित्यर्थः॥त्रैलोक्य
मिति॥सर्वंविष्णुमयंजगदिकृत्स्नंछंदःसंज्ञंतभास्करत्वेवमुक्तं॥लाभ्यांवाङ्म
यंव्याप्तंत्रिविष्टपंतद्वेदाःस्कंभादिगणाःक्षिप्तादेवमूर्त्तयइति
अथैतासांसंज्ञानामभिधेयमाह॥सर्वगुरुर्मुरवंतलौयरावंतगलौसतौ॥
गमध्यौजभौत्रिलोनोछोभवंत्यत्रगणास्त्रिकाः॥७॥सर्वत्रयोगवोगुरवो
यस्मिन्नसोमसंज्ञःमुरवादिर्लोलघुर्यस्मिन्नंतौचद्वौगुरूसयः॥मध्योलघु
रादंतौगुरूयस्यसरः॥अंतोगुरुरादौचलघूयस्यसभः॥अंतोलघुरादौगु
रूयस्यसतः॥मध्येगुरुरादंतौलघूयस्यसजः॥आद्योगुरूरंतौलघूयस्यस
भः॥त्रिलघुर्नइत्यष्टौत्रिकात्रयावर्णाःपरिमाणमेषांतेत्रिकास्त्रिवर्णाःमि
काइतियावत्॥गणाभवंति॥मऽऽऽ॥यऽऽ॥रऽ।ऽ॥सऽ।ऽ॥तऽऽ।॥जऽ।ऽ॥भऽ।।॥नऽ।।॥यद्यपिसूत्रकृतार्यादिषुवक्ष्यमाणानांचतुर्मात्राणा
मेवलःसमुद्रागणइतितृतीयाध्यायगतसूत्रेणगणइतिसंज्ञाकृताथी
स्त्रीश्रीमिस्तादिसूत्रगतमकारंचसंज्ञात्वेनादिवृत्तग्रथस्याप्येवमे
वस्वारस्यंतथापिमात्रादीनांवर्णसमुदायरूपलाक्षणिकेनव्यवहारः॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

३ अतएवाऽत्रायुङ्जिति सूत्रेनजगणाः कर्त्तव्यइतिवृत्तिकारः॥ तथालि
पिंगलगणतोऽपिचेतिमात्रमहणीतिदिक्॥ अत्रेदमवधेयं॥ क्षांह्वन्यनिलरवा
कैंदुनाकामादेःस्वराःक्रमात्॥ श्रीवृद्धिनाशपंथाश्रीसूक्ष्मोर्ध्वायुःफलानि
च॥१॥ दुष्टारसतजायस्माद्वेनादीनांविनाशकः॥ काव्यस्यादौनदात
व्याइतिछंदोविदोजगुः॥२॥ यदादेवर्णाद्यागणोदुष्टफलोभवेत्॥ त
दातद्दोषशुद्ध्यर्थंद्योध्यःस्यादपरोगणः॥३॥ तद्यथा॥ मनौमित्रेभचौ
रीभसाद्युदासीनौजतौस्मृतौ॥ रसावंनौचसंज्ञौद्वौद्वावेवमनीषिणः॥
॥१॥ मित्रोदासीनभस्त्र्योमित्रभ्योशुभौमतौ॥ अन्यैर्यइतरेनेष्टा
इत्यूहंपरिशेषतः॥२॥ गणप्रसंगाद्वर्णानामपिशुद्धिःप्रकाश्यते॥
ऋऽसऽभऽषठऽणास्यफव्याभमरलवी॥३॥ षड्लाःसंयुताश्चान्ये
काव्यादौनशुभामताः॥ अतएवोक्तं॥ अक्षरेपरिशुद्धेतुनायकोभूति
मृच्छतीति॥ सर्वस्यैतस्यापवादोभामहेनोक्तः॥ देवतावाचकाःस्रष्टा
येचाभद्रादिवाचकाः॥ तेसर्वेनैवनिंद्याःस्युर्लिपितोगणतोपिच॥१॥

३

अतएवश्रियःपतिःश्रीमतीत्यादिमहाकविप्रयोगाःसंगच्छंते॥ अथाद्वितीया
ध्यायगतार्थादिलक्षणोपजीव्यानांपंचगणानांस्वरूपमाह॥ ज्ञेयाःसर्वा
तमध्यादिगुरवोत्रचतुःकलाः॥ गणाश्चतुर्लघूपेताःपंचार्यादिषुसंस्थिताः॥८॥
ज्ञेयाइति॥ सर्वश्चअंतश्चमध्यश्चआदिश्चसर्वांतमध्यादयः॥ तेगुरवोये
षुतेतथोक्ताः॥ ह्रस्वांतेश्रूयमाणत्वाद्गुरुपदस्यप्रसेकमन्वयः॥ तेनसर्व
गुरुरंतगुरुर्मध्यगुरुरादिगुरुश्चेतिचत्वारोगणाः॥ ननुतर्हिमस
जभरूपाएवैतइतिपुनःकथनंवृथैवैतेषामतआह॥ चतुःकलाइति॥
चतुर्मात्राएतेनतुअक्षरात्मकासमजभाः॥ तेनसर्वगुरुर्द्विगुरुरित्यर्थः॥ एक
स्यगुरोर्द्विमात्रत्वात्॥ एवमंतगुरोरादौह्रोलघूमध्यगुरावांतयोरादि
गुरावंतावेवज्ञेयौ॥ अन्यथाचतुर्मात्रतानस्यात्॥ एवंचतुरोगणानु
क्त्वापंचमोगणस्तैर्नसहिताःपंचगणाः॥ तथाद्विगुरुरंतमध्या
आदिश्चतुर्लघुरिति॥॥ एषामुपयोगआर्यादिलक्षणेद्वितीयाध्यायेभ
विष्यति॥ यत्तुस्कंधादौव्याख्यातं॥ सर्वत्रांतेमध्येआदौचगुरुर्यस्यांतेऽ

ति॥ तच्चिंत्यं॥ क्रोष्टोरित्यत्र पाणिनिसूत्रस्थनडादिपदेनत्रिकस्त
हिक्रोष्टुमहणमिति सादिमहाभाष्यवार्त्तिकादिग्रंथेनचसहविरोधात्॥
अतएवचित्रगुरित्यत्रचित्राणांगवामयमितिमीमांसकोक्तविग्रहो
पिनश्रद्धेयः॥ अत्रसर्वत्रचेतआदिश्येत्यादिग्रंथेनकर्मधारयंकुर्वतः
कल्लक्षणस्तुमहान्प्रमादः॥ सर्वगुरुगणस्यानुपपत्तेः॥ किंचआद्यं
यो तपदयोर्व्यस्तोऽशुद्धः॥ मात्राप्रस्तारक्रमविरोधादितिषष्ठेस्फुटीकरि
ष्यते॥ अथगुरुलघुस्वरूपमाह॥ सानुस्वारोविसर्गीतोदीर्घोयुक्तपर
श्चयः॥ वापादौतेलसौगुरवोऽन्येमात्रकोलघुः॥ ९॥ सानुस्वार
इति॥ यथातरुणंसर्षपेत्यादावनुस्वारांतोकारगुरुः॥ श्रेयःपतिरि
त्यादौविसर्गीतः॥ युक्तपरःसंयोगपरोयथा॥ तरुणंसर्षपंयत्र स
कारककारः॥ चकारोव्यंजनांतोपियथानतान्नुवोमन्मथविघ्नभीरु
वइति॥ यत्तुभट्टः॥ युक्तपरइति [illegible] व्यंज
नोपधानीयजिह्वामूलीयपराणांउपलक्षणमितिव्याचख्युस्त

त्रव्यंजनांत्रेः॥ उपलक्षणत्वमास्तांजिह्वामूलीयोघंत्रोतुसंयोगपरतेवास्ती
तिकथंतदितिचेत्॥ अयोगवाहनांत्रयेषूपसंख्यातत्वाज्जिह्वामूलीयोपधमा
नीययोर्हलत्वेनकथंचीपनर्गयोरंतयेणसंयुक्तत्वात्तथोक्तंहयवरट्सू
त्रभाष्येउदाहृतंकरुलोनंतरःसंयोगइतिसंयोगसंज्ञेति॥ एवंगानुस्वारग
णंतुगोबलीवर्द्दन्यायेन॥ एवंविसर्गीस्यापीतिज्ञेयं॥ एवंरुस्वस्यगुरुत्व
मुक्तं॥ दीर्घश्चयगुरुः॥ तरुणंसर्षपत्रात्रकमित्यत्रैवत्रकारात्परआकारःवापा
दांतइति॥ पादस्येहसमोग्राह्यः॥ तदंतलघोर्गुरुत्वंवैकल्पिकं॥ तेनगुरु
त्वात्तजतौतुवंत्रास्यमुदीरितंजरौइतिवंत्रास्थलक्षणंजगन्निवासोवस्क
देवसप्तनीसत्रसंगतंभवति॥ अन्यथासप्तनीतीकारस्यलघुत्वेनभग
णांतत्वंस्यात्॥ क्वचिन्तुलघुतैवतेनज्जौसमानिकागलोचेत्यादौसमा
न्विकादिलक्षणसमन्वयः॥ विषमपादांतलघोरनुस्वारादिपरसंयो
गेनगुत्वं॥ अतएवससेमकाव्यप्रकाशेऽतोक्तं॥ विकसितसहकारभा
रहारिपरिमलमुज्जितगुंजिद्भिरफदिति॥ अत्रपरिमलपदंसल्लक्षणपूर्वंव

णीस्यगुरुत्वार्थं प्रमुदितइति पाठेयुक्तइति॥ कवयस्तुविषमपादांत्यस्यापि
गुरोःस्थानेलघुंप्रयुंजते॥ यथा॥दिवाकरादक्षतियोगुहासुरुस्वादि॥अथगु
रोःप्रस्तारेलक्षनसंप्रदायमाह॥वक्रइति॥यथा॰ऽअन्यगुरोरन्येमात्रिका
लघुर्ज्ञेयःसतुऋजुर्लक्ष्योयथा॥अथगुरोरपिक्वचिल्लघुत्वमाह॥पा
दादाविहवर्णस्यसंयोगःक्रमसंज्ञकः॥पुरःस्थितेनतेनस्याल्लघुतापिक्वचि
द्गुरोः॥१०॥इदमस्यादाहरणं॥तरुणंसर्षपशाकंनवौदनंपिच्छलाजिदधी
न्न॥अल्पव्ययेनसुंदरिग्राम्यजनोमिष्टमश्नाति॥१॥पादादाविति॥पादा
देर्योयःसंयोगःसक्रमसंज्ञः॥तस्मिन्परतःपूर्वस्यगुरोरपिवर्णस्यलघुतास्या
त्॥अस्येति॥लघुत्वस्येत्यर्थः॥तरुणमिति॥अत्राल्पव्ययेनसुंदरीतिर्
तीयपादांशऽकारोग्राम्येतिसंयोगपरत्वाद्गुरुरित्यार्यायास्तृतीयपादस्यह्रस्व
ऋमात्रतानप्रकल्पतइतिअतस्तस्यलघुत्वमुच्यते॥यदुक्तंऋतेबोध्ये॥
यस्याःपादेप्रथमेह्रस्वमात्रास्तथाततीयेपि॥अष्टादशद्वितीयेचतु
र्थकेपंचदशसार्या॥१॥इति॥वस्तुतस्तुसूत्रादिग्रंथपर्यालोचने ५

आर्यायाःपादव्यवस्थानंलभ्यते॥अतएवपादादाविहवर्णस्येतिपाठःक्वचिपु
स्तकेषूपलभ्यते॥युक्तश्चायं॥स्वरानुस्वारेपहितोद्विरुच्यतेसंयोगादिःसक्रमे
इतिबहुचप्रातिशाख्यादाधपादादावपिक्रमसंज्ञायाअभ्युपगमात्॥कथा
विसंज्ञुक्तपरोयलकुहोइतिप्राकृतपैंगलेसामान्यतःकुत्रापीसंधानात्॥
प्रासनाभिरुदमज्जनमाशुप्रस्थितंनिवसनमरुणायेतिमाघादौनामीतीका
रस्यकेतिसंयोगपरस्यापिलघुतायाऔचित्याच्चअन्यथास्वागतानोनोगि
तिसूत्रासंगतेरितिदिक्॥सरस्वतीकंठाभरणकारस्तु॥यदातीव्रप्रयत्नेन
संयोगादेरगौरवं॥नचदोर्लंगमप्याकुस्तदादोषायसूरयइत्याह॥एतेनच
दोलंगमीसापूर्वोक्तमाद्यश्लोकेरुद्रदृष्टमपनीयनद्रष्टःपठनीयइतिदु
र्घटवृत्तिकारोक्तमनादेयं॥११॥अस्मिन्नुत्तरसर्गादौज्ञेयाःसंज्ञास्तुलोक
तः॥ज्ञेयःपादश्चतुर्थांशोयतिर्विच्छेदसंज्ञिता॥१२॥अत्रेयंनुष्टुभिरन्या
तमिस्रादोव्यवहृतानामितिक्रोष्टुः॥चतुर्थांशइतिश्लोकस्थेतिक्रोष्टुः॥आ
र्यादिषुवक्ष्यमाणायायतेःस्वरूपमाह॥विच्छेदइति॥यथावक्ष्यतिषष्ठेद्वि
तीयकादिसादिसंज्ञांतरमाह॥युक्तसमंविषमंवायुक्तस्थानंसद्भि

६ निगद्यते॥ समममर्धसमंवृत्तंविषमंचतथापरं॥३॥ युग्मेति॥ समपादस्य संज्ञा यथावक्ष्यतेनुष्टुप्प्रकरणे॥ युजौर्जेनसरैर्भ्रौर्स्लाद्यैः॥ अयुग्मेतिविषमपादस्यसंज्ञायथातत्रैववक्ष्यति॥ चपलावक्त्रमयुजोरिसादि॥ चकारात्समपर्योयोयुग्मत्राष्टोविषमपर्यायओजत्राष्टश्चतेयः॥ यथावक्ष्यति॥ वैतालीयप्रकरणे॥ यदासमावोजयुग्मकावित्यादि॥ समेति॥ यथातृतीयाध्याये वक्ष्यति॥ मुःश्रीरित्यादि॥ अर्धसमेति॥ यथाचतुर्थेवक्ष्यति॥ विषमेयदि सौसलगाइत्यादि॥ अत्रद्रुतमध्यादीतिभट्टोक्तव्याख्यानंचिंत्यं॥ उपजात्यास्यसामेबीजाभावात्॥ विषमंचेति॥ यथापंचमेवक्ष्यति मुखपादोष्ठनिरित्यादि॥ एषांत्रयाणांस्वरूपंश्लोकत्रयेणाह॥ अंघ्रयोयस्यसमेत्यादिना॥ अंघ्रयोयस्यचत्वारस्तुल्यलक्षणलक्षिताः॥ तच्छंदःशास्त्रतत्त्वज्ञाः समंवृत्तंप्रचक्षते॥४॥ प्रथमांघ्रिसमोयस्यतृतीयश्चर्णोभवेत्॥ द्वितीयस्तुर्यवद्वृत्तंतदर्धसममुच्यते॥५॥ यस्यपादचतुष्केपिलक्ष्मभिन्नंपरस्परं॥ तदाकुर्विषमंवृत्तंछंदःशास्त्रविशारदाः॥६॥ यस्यचत्वारःपादास्तुल्यास्तत्समं॥ यस्यप्रथमतृतीययोर्द्वितीयचतुर्थयो ५५

श्चपादयोश्चसाम्यंतदर्धसमं॥ यस्यचत्वारोपिपादाविलक्षणास्तद्विषममित्यर्थः॥ आरार्येकाक्षरात्सादेरेकैकाक्षरवर्धितैः॥ पृथक्छंदोभवेत्सार्द्धं यावत्षड्विंशतिंगतं॥१०॥ तदूर्ध्वंचंडवृष्ट्यादिदंडकोपरिकीर्तिताः॥ त्रिषंगाथास्त्रिभिःषड्भिश्चरणैश्चोपलक्षिताः॥१८॥ एकाक्षरमारभ्यषड्विंशात्संतमेकाक्षरवर्धितैःपादैःसमंवृत्ततृतीयेध्यायेपृथक्कृत्वेदं॥ ततूर्ध्वमितिषड्विंशात्स्कंधेचंडवृष्ट्यादीति॥ अत्रादिनाव्यालजीमूतादयइतिस्कंधोक्तिःचिंत्या॥ अर्णार्णावकोत्साहस्यनिर्बीजत्वात्॥ त्रिषमिति॥ ततस्त्रिषड्भिश्चरणैरुपलक्षितानांगाथानांप्रकरणरूपंत्रिषमित्यर्थः॥ एकाक्षरादिषड्विंशात्संतानांछंदसांक्रमेणसंज्ञाःश्लोकत्रयेणाह॥ उक्तेत्यादिना॥ उक्तोक्तातथामध्याप्रतिष्ठान्यासपूर्विका॥ गायत्र्यनुष्टुप्चबृहतीपंक्तिरेवच॥१९॥ त्रिष्टुप्चजगतीचैवतथातिजगतीमता॥ शक्वरीसातिपूर्वास्याद्दृष्टासप्तीततःस्मृते॥२०॥ धृतिश्चातिधृतिश्चैवकृतिःप्रकृतिराकृतिः॥ विकृतिःसंकृतिश्चैवतथातिकृतिरुत्कृतिः॥२१॥ इत्युक्तोछंदसांसंज्ञाःक्रमशोवक्ष्यमाणं॥ लक्षणंसर्ववृत्तानांमात्रावृ

त्तानुपूर्व्वी:॥२२॥इतिश्रीदुर्गादासविरचितेवृत्तरत्नाकरेसंज्ञाख्यानंनाम
प्रथमोध्याय:॥१॥इसक्ताइति॥द्वितीयेमात्रावृत्तमुक्तासर्व्ववृत्तानांलक्ष
णंसंप्रतंतृतीयादौवक्ष्मि॥वक्ष्यामि॥नतीमानसामीप्येवर्त्तमानवत्प्रस
य:॥इतिश्रीमदग्निहोत्रकुलतिलकायमानश्रीमदाघाजीभट्टसूनुभा
स्करधिरचितेवृत्तरत्नाकरेतौ प्रथमोध्याय:॥ अथपद्यद्वयेना की
लक्षयति॥लक्ष्मैतद्दिसाद्दिना॥लक्ष्मैतत्सप्तगणागोपेताभवतिने
हविषमेज:॥षष्ठोयंतलघूवा प्रथमेर्धेनियतमाथोथा:॥१॥यत्रच
तुर्मात्रागणा:सप्तभवंति॥एकेनगुरूणाषष्ठस्थानीयेनसहिताश्चैत
तूआर्यायाः प्रथमेर्धेनियतंलक्ष्मलक्षणंज्ञेयं॥एवंहिसप्तगणानांअ
ष्टाविंशतिमात्रा॥२८॥अष्टमस्थानीयगुरोस्तुद्विमात्रेरुतिसंयोज
नात्त्रिंशन्मात्रा॥०वैकृष्यमार्यायाप्रथमार्धलक्षणंपर्य्यवसन्नं॥त
स्मिन्विप्रेषेणेसाहु॥भवतिनेहेतिहरुप्रथमेर्धेविषमेविषमस्थाने
प्रथमतृतीयपंचमसप्तमाख्येद्विगुर्वादिवर्णमध्यगुरूरूपश्चतुर्मात्र ७

त्वात्सोपिजोजगणोनामभवति॥समत्वंनियतः॥कुतर्हिनियतःस्यादतआह॥
षष्ठइति॥षस्मापूरणःषष्ठः॥वाअथवाषष्ठोनलघुर्द्वयोनश्यलघुश्चनलघू॥
नगणस्त्रिलघुःएकइतिहिलघुश्चेतिचतुर्लघुरूपोगणःषष्ठोदृश्यतियाव
तू॥तथाचजगणश्चतुर्लघ्वन्यतरएवषष्ठइतिनियमःफलितः॥यथात्रै
वलक्षणसमन्वयः॥लक्ष्मैइतिद्विगुरूरूपश्चतुर्मात्रएकोगणः॥एवंत
सइतिद्वितीयःप्रगणाइसंतगुरुस्तृतीयः॥गोपेइतिद्विगुरूश्चतुर्थः॥
ताभवइत्यादिगुरुःपंचमः॥तिनेहेतिमध्यगुरुःषष्ठः॥विषमेइसंतगु
रुःससमइतिससगणानामष्टाविंशतिमात्राः२८जइतिचातेगुरुस्तिंशि
तस्यद्विमात्रेरुतिसंयोजनात्त्रिंशन्मात्राः३०संतिप्रथमार्धे॥नास्तिच
विषमस्थानेजगणःषष्ठस्तस्सेवतिनेहेतिनचव्यंजनेचार्धमात्रिक
मितिउक्तेर्व्यंजनद्वयसंयोगस्यमात्रात्मकत्वात्लक्ष्मैइत्यादौमात्राधिक्या
त्त्रिंशन्मात्रारूपलक्षणासंगतिरितिवाच्यं॥अत्रमात्राणामेवगणा
त्मनाव्यंजनसंयोगानामतथात्वात्॥नलघूवेत्यस्योदाहरणंतृतीय

८ पद्यप्रमार्धेतेयं॥अत्रषष्ठोयमितिषष्ठस्थानेअगणइतिसंधोक्तंव्याख्यानम
नादेयंप्रथमार्धस्यषष्ठ्यर्थेलक्षणाप्रसक्तेः॥यच्चनलघूवेसत्रैगणयुक्तोलघुरि न
तिसल्लक्षणआह॥तन्नानघूइतिद्विवचनानुपपत्तेः॥एवमार्यायाःपूर्वार्धं
लक्षयित्वाद्वितीयेनपद्येनयतिनियममुत्तरार्धलक्षणंचाह॥षष्ठेद्वितीय
यलासरकेन्लेमुखलाच्चसयतिपदनियमः॥चरमेर्धेपंचमकेतस्मादि
हभवतिषष्ठोलः॥२॥षष्ठेद्वितीयलादिति॥अत्रप्रथमेऽनुवर्त्तते॥षष्ठ
स्थानेन्लेनगणयुक्तेलघौचतुर्लघाधितियावत्॥कृतेसतिचतुर्लघुसंबं
धीयोद्वितीयोलघुस्तस्मात्प्रथमेपूर्वस्मिन्प्रथमलघौसयतिसविच्छेदंपदस्य
नियमःसमाप्तिः॥परकेरिति॥सप्तमस्थानेन्लेसतिमुखलादाद्यलघोःप्रथ
मेषष्ठगणांतेसविच्छेदंपदसमाप्तिरित्यर्थः॥यथात्रैव॥षष्ठेद्वितीयलासर
केन्लेमुखलाच्चेसत्रषष्ठचतुर्लघुप्रक्रियायतिःसयतीसत्रतुसप्तमंन्लघु
२ प्रयुक्ता॥अत्रयद्यपितंपरिहृत्तुतीरइमणअंपीसादाविवद्वितीयतृतीया
यंतगुर्वादिगुरुनदेयाधितिकाव्यप्रकाशेभिधानाल्लासरइतितृतीयआ

८

य

रु द्विगुर्नयुक्तस्तथापितयोरुक्तस्थानेयुगपत्प्रयोगोनिषिद्धोनतुकाव्यंयत्रसे
त्रैवपार्थक्येनापीसदोषः॥अथोत्तरार्धेयतिर्नियमाह॥चरमेइति॥अं
तिमेर्धेपंचमस्थानेन्लेसतितस्यप्रथमलघोःपूर्वस्मिन्नुचतुर्थगणांतेयतिः॥
यथाचरमेर्धेपंचमकेतस्मादिहभवतीति॥अथोत्तरार्धलक्षणमाह॥इहभ
वतिषष्ठीलइति॥आर्योत्तरार्धेषष्ठगणस्थानेपन्नएकोलघुरवदेयो
नचतुर्मात्रोगणः॥रेषंपूर्वार्धवत्॥एवंहिपंचगणानांविंशतिमात्राः॥२॥
षष्ठगणस्थानीयलघोरेकास्यगणस्यचतस्रः४अष्टमस्थानीयगुरो
र्द्वेरितिसंयोजनात्सप्तविंशतिमात्रा२७वैतृतीयार्यामार्योत्तरार्धलक्षणं
पर्यवसन्नं॥अस्तिचेदंचरमेइत्यादिनोत्तरार्धेषष्ठेयमित्यादिपूर्वपद्यो
त्तरार्धेचेतिचयंसंगमनीयं॥भेदाआर्याद्विवृत्तेषुभूयांसःसंतियद्यपि
तथाप्यनुपयुक्तत्वान्नक्रेवकिलतानिह॥इत्यार्यालक्षणं॥अथपथ्या
र्यालक्षणमाह॥त्रिष्विति॥त्रिषुत्रयाणांकेषुपादेदलयोराद्येषुदृश्यतेयस्याः॥
पथ्येतिनामतस्याः॥प्रकीर्त्तितंनागराजेन॥१॥यस्यद्वयोरप्यर्धयो

९ ऽस्रेषुअंघ्रिकेषुचतुर्मात्रगणेषुपादेविरामोदृश्यतेसापथ्येतिकेवलंयतिरू
तमार्यीतोस्यावैलक्षण्यंयथा॥त्रिषंघ्रिकेषुपादेइस्रास्यांतेयतिःपूर्वार्द्धेपथ्ये
तिनामतस्याइसश्चोत्तरार्धे॥अथविपुला॥तुलुप्यगणत्रयमादिमंघ्रिरू
लयोर्द्वयोर्भवतिपादः॥यस्यास्तांपिंगलानागोविपुलामितिसमाख्याति॥तु
लुप्यगणत्रयमाइतिगणत्रयमुल्लंघ्यद्विमिस्त्रविरामः॥एवमुत्तरा
र्द्धेपिसेयंविपुलाइतिःप्रसिद्धै॥अथचपला॥तुपथार्द्धयोर्जकारोद्वितीय
तुर्यौगमध्यगोयस्याः॥चपलेतिनामतस्याःप्रकीर्त्तितंनागराजेन॥गु
र्वोमध्यगतोजगणोयस्याद्वयोरप्यर्धयोर्द्वितीयचतुर्थौस्यातांसाचप
लाआर्या॥यथापूर्वार्द्धेनिर्णीतेद्वितीयोर्द्धयोर्जइति॥द्वितीयोजगणः॥
द्वितीयइतिचतुर्थेपि॥एवमुत्तरार्द्धेतिनामेतिद्वितीयोजगणःप्रकी
र्त्तितइतिचतुर्थश्च॥अथमुखचपला॥आद्यंदलंसमस्तंभजतेतलक्ष्म
चपलागतंयस्याः॥द्वेपूर्वंजलक्ष्मामुखचपलासोदितामुनिना॥यस्या
आद्यमर्धंचपलालक्षणविक्रिष्टं॥याक्रोष्टुत्तरार्धेपूर्वंजलक्ष्मा॥आ
र्योत्तरार्द्धसामान्यलक्षणेनसप्तविंशतिमात्मारूपेणविश्लिष्टासामुख ९

चपला॥अन्वर्थोचेयंसंज्ञा॥मुख्येपूर्वार्द्धेचपलालक्षणवत्त्वात्एवमुत्तरा
र्द्धेचपलालक्षणवत्त्वाज्जघनचपलायाअपि॥अतएवाह॥आद्यमिति॥
प्राक्प्रतिपादितमर्धंप्रथमंप्रथमेतरेचचपलायाः॥लक्ष्मभवेत्सोक्ता
विशुद्धधीभिर्जघनचपला॥यस्याःप्रथमेर्धेआर्यापूर्वार्द्धलक्षणंप्रथमे
तरेद्वितीयेचपलालक्षणंसाजघनचपला॥प्रथमंमितरद्यस्मादितिबहु
व्रीहिः॥अथगीतिः॥आर्याप्रथमदलोक्तंयदिकथमपिलक्षणंभवेदुभ
योः॥दलयोःकृतयतिर्नोभांतांगीतिंगीतवानूफजंगेन्द्रः॥यस्याःपूर्वार्द्ध
वत्द्वितीयार्द्धेपिलक्ष्मैतदिसादिपूर्वार्द्धलक्षणंभवेत्तांपिंगलोगीतिमुक्त
वान्॥कथमीतिपूर्वोक्तषष्ठोयंनलघूचेतिलक्षणयोरन्यतरपक्षेणा
पीसर्धः॥यत्तुस्कंधायां॥षष्ठजगणचतुर्लघुगणान्यतमप्रकारेणेति
व्याख्यातं॥तदसदुं॥षष्ठजगणचतुर्लघुरूपयोर्द्वयोरेवैकस्यनिर्धा
रणात्॥अन्यतमशब्दोहिबहुविषयकनिर्धारणेप्रयुज्यते॥यदुक्तं॥
पश्यशार्यांकैयटेन॥अन्यतरान्यतमशब्दयवुसन्नोस्वार्थाद्विबहु
विषयेनिर्धारणेवर्त्तेते॥अथोपगीतिः॥आर्याद्वितीयकेर्द्धयद्वद्वि

तं लक्षणं तत्स्यात्॥ यद्यप्ययोरपि दलयोरुपगीतिं तां मुनिर्ब्रवेत्॥ इहापवतिषष्ठो
लघुस्यात्तेत्तरार्द्धलक्षणं यस्यां द्वयोरप्यर्धयोः स्यात्सोपगीतिः॥ अथोद्गीतिः॥
आर्याश्चकलद्वितयं व्यत्ययरचितं तामुदीरयेद्यस्याः सोद्गीतिः॥ किल कथितोतद्वय
संज्ञकोदसंयुक्तः॥ यस्याअर्धद्वितयं द्वितीयमर्धपूर्वार्धलक्षणकंपूर्वार्धं तू
त्तरार्धलक्षणकमितिव्यत्ययेनरचितंसोद्गितिः॥ तद्वदिति॥ पथ्यार्यावद्वि
तिथावः॥ यस्यंक्रेति॥ त्रिंशन्मात्रकेषिसाद्युक्तसंयुक्तेसत्यर्थः॥ अथार्यागीतिः॥
आर्यापूर्वार्धंयदिगुरुणैकेनाधिकेनिधनेयुक्तं॥ इतरत्तदन्निखिलंभ
वतियदीयमुदितेयमार्यागीतिः॥ इतिगीतिप्रकरणं॥ त्रिंशन्मात्रकंपूर्वा
र्धंनिधनेअंतेएकेनगुरुणायुक्तंद्वात्रिंशन्मात्राविशिष्टपूर्वार्धमितियावत्॥ यदीयंस्यात्॥ उत्तरार्द्धमपिनिखिलंतदुत्तद्वात्रिंशन्मात्राविशिष्ट
मित्यर्थः॥ साऽऽर्यागीतिः॥ तथोचोक्तंसूत्रकारेण॥ अर्धेवसुगणआ
र्यागीतिरितिः॥ अत्रसूत्रेऽर्द्धइतिवसुगणइतिचप्रथमाद्विवचनांत
मितिसुधादावुक्तं॥ तन्न॥ इदूदेद्विवचनंप्रगृह्यइतिप्रगृह्यत्वात्सु १०
तिभावापत्तेर्यादेशाद्यनापत्तेः॥ तस्मादेतत्सूत्रमित्थंवृत्तिःकर्तव्या

ख्यातं॥ आद्येर्धेद्वितीयेचाष्टगणेससार्यागीतिरितिः॥ एतेनपूर्वार्धेद्वात्रिंशन्मा
त्राउत्तरार्धेत्वेकोनत्रिंशन्मात्राआर्यागीतोभवंतीतिमन्यमानाः॥ कल्लिणा
दयोपिनिरादृताः॥ मधुकरविटपानमितास्तरुपंक्तीर्भ्रमंतोस्यविटपानमंताः॥
परिपाकपिंगलतारजसारेधश्चकास्तिकपिंगलतेतिमाघोक्तार्यागी रू
दाहृतिर्विरेधाश्च॥ इतिगीतिप्रकरणं॥ अथवैतालीयं॥ षड्विषमेष्टौसमे
कलास्ताश्चसमेस्युर्नोनिरंतराः॥ नसमात्रपराश्रिताकलावैतालीयेतेरलौ
गुरुः॥ वैतालीयेछंदसिविषमेपादेप्रथमतृतीयरूपेषट्कलाःषट्मात्रादेयाः
तासामंतेचरलौरश्चलश्चरलौमध्यलघुरगणः॥ अन्योलघुश्च॥ ततो
गुरुश्चेति॥ समेपादेद्वितीयचतुर्थरूपेतुअष्टौकलादेयाः॥ताश्चनिरंतरा
नोस्युः॥ नाइतिनिषेधार्थः॥ अव्यवहितालघवोनदेयाइत्यर्थः॥ सौतोमष्ट
कलानांमंतेविषमपादवद्गणोलघुश्चगुरुश्चदेयौ॥ अत्रआसप्तषट्क
लासुमध्येसमाकलाद्वितीयाद्विकापराश्रितातृतीयाद्याश्रितानकर्तव्याः॥
द्वितीयातृतीयाभ्यामेकोगुरुर्नकर्तव्यइत्यर्थः॥ एवंचतुर्थीपंचमीभ्यां

ष्यांषष्ठीसप्तमीभ्यांच॥तदिदंवैतालीयलक्षणं॥अस्तिचेदमत्रैवषड्विषमेइतिप्र
थमेविषमपादेषण्मात्रास्तासमंतेद्वौसमेइतिरगणस्तदंतेचकलाइतिलघुगुरूना
स्तिचद्वितीयातृतीयाभ्यांचतुर्थीपंचमीभ्यांचमात्राभ्यामेकोगुरुः॥कंतर्हिप्रथमा
द्वितीयाभ्यांपंचमीषष्ठीभ्यामस्ति॥एवंतृतीयपादेपिद्रष्टव्यं॥अथद्वितीयसमपा
देतास्त्रयसमेस्युरिसप्तैमात्राःसंतितदंतेनोभिरमितिरगणः॥तदंतेतराइति
लघुगुरू॥मात्राश्चशुद्धाअष्टौलघवोनसंतिकिंतुगुरुभिश्रिताःनापिद्वितृती
यादिमात्रातृतीयाद्याश्रिताःस्तिएवंचतुर्थपादेष्वपि॥अथोपचंदसिकं॥पर्य
तेयौतथैवद्वेषंद्वौपचंदसिकंसुधीभिरुक्तं॥अथसमेविषमपादेषण्मात्रा
स्तदंतेरगणयगणौसमपादेऽष्टौमात्रास्तदंतेरगणयगणौयत्रतदौपचं
दसिकं॥तथैवद्वेषमितिं॥यद्यपिविषमपादंसलघोर्नगुरुत्वमितिप्रागु
क्तंतथापिकविसमयप्रसिध्यारसादिकाव्यविषयंतन्नेतादृग्विषयमि
तिभावः॥अथापातलिका॥आपातलिकाकथितेयंप्राकृतकावथपूर्ववय
दन्यत्॥विषमेषट्मात्रासमेष्टाविसादृपूर्ववत्॥इयंस्कंधविशेषः॥ता
सांतेभगणोद्वौगुरूचेति॥अन्यदिति॥चकारोद्यंजनांतस्यापिरु ११

स्यस्यगुरुताथाःप्रागुक्तत्वात्गुर्वंसताद्रष्टव्या॥अथदक्षिणांतिका॥तृतीययुक्
दक्षिणांतिकासमस्तपादेषुद्वितीयलः॥यस्यवैतालीयस्यचतुर्षुपादेषुद्वितीयोल
घुस्तृतीयेनलघुनायुक्तःस्यात्॥प्रथमोलघुर्द्वितीयोगुरुरेवस्यात्इतियावत्॥
सादक्षिणांतिका॥अथोदीच्यवृत्तिः॥उदीच्यवृत्तिर्द्वितीयलःसप्तकोत्रेणाभवेद्
युग्मयोः॥यत्रायुग्मकोर्विषमयोरेवपादयोरत्रेणतृतीयेनयुक्तश्चेद्द्वितीयो
लघुःस्यात्तद्वैतालीयमुदीच्यवृत्तिसंज्ञंस्यं॥अथप्राच्यवृत्ति॥पूर्वेणयु
तोथपंचमःप्राच्यवृत्तिरुदितेतियुग्मयोः॥चतुर्थेनयुक्तःपंचमश्चेल्लु
घुःसमपादयोःस्यात्तद्वैतालीयप्राच्यवृत्ति॥अथप्रवृत्तकं॥यदासमोवो
युग्मकोविषमाप्राग्वत्पूर्वयोर्भवति तत्प्रवृत्तकं॥पूर्वयोरुदीच्यवृत्तिप्राच्य
वृत्तोःसदृशौओजयुग्मकौविषमसमपादौविषमपादउदीच्यवृत्तेःसम
पादःप्राच्यवृत्तेरितियथासंख्येनान्वयः॥क्रमश्चेद्रासामास्यादितिता
र्किकन्यायादितिभावः॥तत्प्रवृत्तकंनाम॥अथापरांतिका॥अस्ययुग्म
रचितापरांतिका॥अप्रवृत्तकस्यसमपादैःप्राच्यवृत्तिर्लक्षणैर्यासर्वपा ९२

१२ दैरुचितासापरांतिका॥अथचारुहासिनी॥अयुगमयुक्चारुहासिनी॥या प्रव
र्त्तस्यविषमपादैरुदीच्यवृत्तिलक्षणैरुचितासाचारुहासिनीनामं॥इति
वैतालीयप्रकरणं॥अथानुष्टुप्प्रकरणं॥वक्त्रंनाद्यानसौस्यातामभेयं
नुष्टुभिख्यातं॥युजोर्जेनसरिद्भर्तुःपथ्यावक्त्रंप्रकीर्त्तितं॥अनुष्टुभिअ
ष्टाक्षरेछंदसिआद्यादक्षरादग्रेनगणोनदेयोनापिसगणःकिंतुमग
णादयोदेयाः॥किंचाष्टमेभ्यतुर्थादक्षरादग्रेयोयगणोदेयः॥तदग्रेचा
न्यएकोवर्णोदेयः॥ईदृङ्मनुष्टुप्छंदोवक्त्रमिष्यते॥यथात्रैववृत्ता च्य
द्यादक्षरात्तत्रनाद्यइतिसर्वगुरुर्मगणोऽस्तिनतुनगणसगणोचेति
चतुर्थादक्षरादग्रेवसौस्येसस्तिमगणः॥एवंद्वितीयपादेपिद्रष्टव्यं॥अथव
क्त्रस्यभेदमाह॥युजोरितियुगितिसमपादस्यसंज्ञेसूक्तमाद्येन॥युजोःस म
पादयोःसरिद्भर्तुश्चतुर्थादक्षरादग्रजेनजगणस्त्वप्रयोगेणविषमपा
दयोर्यगणोनचपथ्यावक्त्रंप्रकीर्त्तितं॥अयंश्लोकवक्त्रवृत्तं॥एवम
न्येपि॥ओजयोर्जेनवारिधेस्तदेवविपरीतादि॥विषमपादयोर्वी १२

रिधेश्चतुर्थादक्षरादग्रेजेनजगणप्रयोगेणसमपादयोर्यगणोनचविपरीतप
थ्यावक्त्रंनाम॥चपलावक्त्रमयुजोर्नकारश्चेत्यौराट्॥विषमपादयोश्चतु
र्थादक्षरादग्रेनगणप्रयोगेणसमपादयोर्यगणोनचचपलावक्त्रंनाम॥अथ
युग्मविपुला॥यस्यांलःससमोयुग्मेसायुग्मविपुलामता॥समपादयोर्यस्यां
ससमोलघुःस्याच्छंदसिवक्त्रवृत्तसायुग्मविपुलानाम॥यद्यपीदंयुजोरित्यादिप
थ्यावक्त्रेप्यस्तितथापिउपजेयसंकरत्वाददोषः॥एवंपिंगलमतेनविपुलो
क्ता॥अथसैतवमतेनाह॥सैतवस्यात्विलेष्वपि॥चतुर्ष्वपियत्रससमो
लघुःसाविपुलेतिसैतवस्यमतमित्यर्थः॥येतुचैर्थंजगणोनेवसैतववि तु
पुलामाकुस्तेषांनियमेकिंमानमितिनविद्मः॥तस्मात्सायुग्मपुलामतेसत्रे
षतजसनान्यतमोगणोनचतुर्षुपादेषुससमेलघौसतिसैतवविपुले
तिनिर्णीयः॥यथा॥सामकंलक्षणं॥स्यात्ससमोयत्रलघुश्चतुर्षुचरणे
षुसाविपुलोक्तासुमतिभिःसैतवस्यमतेनतुस्फुटं॥अथविपुलाभेदानाह॥
तेनार्द्धितोभाद्विपुला॥चतुश्चरणेषुचतुर्थजगणाप्रयोगेणाविपुला
स्यात्॥अतएवएकेनैवचरणेनेयंलक्षिता॥यत्तुसुश्रुतोनोक्तं॥वि

१२ षमप्रयोगेणाभविपुलेति। तन्न। नौ नौ चेति सामान्यतश्चतुर्थाद्गणेनाभवि
पुलायाः सूत्रकारेणलक्षितत्वाद्विषमपादयोरित्यत्रमानाभावात्तु। यद्यपि नौ
नौ चेत्यत्रचपलायुजोरितिसूत्रादयुग्ग्रहणमनुवर्त्ततइतिवृत्तिका
रेणोक्तं। तदपिन। सर्वतःसैतवस्येतिसूत्रात्तन्निहितस्यसर्वपदस्यैवा
नुवृत्तेर्युक्तत्वात्। विपुलायुग्लःससमइतिसूत्रेयुग्ग्रहणेनव्यवहि
तपदानुवृत्तिर्नास्तीतिसूत्रकृताज्ञापितत्वाच्चैतेन चपलावक्त्र
मित्यायनुवर्त्ततेइतियत्कुलकेनोक्तं तदपास्तं। यद्यपितेनोदाहृतंवि
ला क्षोक्षिकामगजकुंभाभविपुलस्तनीत्यादि। तदपिन। तस्यसेतू
क्तविपुलालक्षणाक्रांततयाभविपुलालक्ष्यलाभात्तु। एवंहि
वटेवटेत्येश्रवणश्चलेरचलेरिवइत्यादिमहाकविप्रयोगा
अपिनास्माकंप्रतिकूलाः। एवंसतितविपुलास्त्यक्तेयं। इयमन्या
रश्चतुर्थीतु। चतुश्चरणेषुचचतुर्थीदक्षराद्गणप्रयोगश्चेत्तू
तदान्याविपुलास्याद्स्वर्थः। नौबुधुश्चेन्नविपुलाः। चतुर्षुच १३

तुर्थान्तगणश्चेत्तदानविपुलानामः। तोभेस्तसूर्वान्याभवेत्तु। चतुर्षुचतु
र्थीस्तगणश्चेत्तविपुलानामः। अत्रान्यग्रहणान्नयसगणेर्धिपुलोत्रयम
नुक्तेपिज्ञेयमितिप्राचः। सूत्रादावनुक्तात्प्रमाणमितिनव्याः। अयं
तेषामाशयः। विशेषलक्षणेनयदाक्रांतंलक्ष्यंतस्यतेनलक्षणेनाम्नाव्य
वहारः। यत्त्वनाक्रांतंतत्स्यादुष्टमितिसामान्यजातिनाम्नाव्यवहार
इतिनलक्ष्यविरोधइति। इसनुष्टुप्सूत्रकरणं। अथान्यानिमात्राछंदां
स्याहः। द्विगुणितवक्त्रलघुश्चलघ्वतिरितिचः। वसवोष्टौद्विगुणितं
यस्यवः। तत्संख्याकालघवोमात्रायस्यांसाऽचलधृतिर्नामः। प्रत्येकंषो
डशलघुपरिमिताश्चत्वारःपादाअस्याभवंतिः। एवमग्रेपिः। पिंगलस्त्वि
मांगीसार्धमाचष्टेः। अथास्यामेदानाहः। मात्रासमकंनवमोलोतं।
यत्रषोडशमात्रेछंदसिनवमीमात्रालघुरेवअंतिमोयर्णोगुरुरेव
स्याद्वेषेलघुनियमः। तन्मात्रासमकंनामः। जोन्लावथांबुधेर्विश्लो
कः। अंबुधेश्चतुर्मात्रातोजगणश्चेद्वेषंप्राग्वत्तदाविश्लोकइति

१४ नामकंछंदः॥अस्तिचेहअथबुधइतिजगणः॥अथयाच्चतुर्मात्रातो
न्तौनगणोलघुश्चयस्यस्यात्तस्यापिश्लोकइतिनाम॥अस्मिन्पक्षेल
२ क्षणंचिन्त्यंवेजोन्तावथजलधेर्श्लोकइति॥तद्युगलाद्वानवासिका
स्यात्॥अंबुधेर्युगुलादष्टमात्रातदर्थः॥चेज्जगणोनगलघूवा
सावानवासिकानाम॥अस्तिचेहनवासीतिजगणःन्लपक्षेतुयान
वासिकाजलधियुगात्यादितिलक्षणरचना॥बाणाष्टनवरुद्रयदि
लश्चित्रा॥पंचाष्टनवरुद्रयदिलघुःस्यात्साचित्रानाम॥त्रोषंप्राग्वत्॥
उपचित्रानवमेपरयुक्ते॥नवमस्थानेगुरौसतिउपचित्रानाम॥
इमामेवान्यमतेनाह॥अष्टाभिर्गात्याउपचित्रा॥अष्टमात्रातोगु
रुलघुयगणप्रयोगादुपचित्रेत्यर्थः॥अथपादाकुलकमाह॥यदती
तद्धतधिविधलक्षयुतैर्मात्रासमादिपादैःकलितं॥अनियतवृत्त
परिमाणयुक्तंप्रथितंजगत्कुपादाकुलकं॥उक्तैर्विविधलक्षणैर्मा
त्रासमकादिलक्षणैर्युताये मात्रासमकादिपादास्तैःकलितंयुक्तं १४

पादश्चेत्येपिअनियतवृत्तानामनेकवृत्तानांमात्रासमकविश्लोकवान
वासिकाचित्रोपचित्राणांपरिमाणेननियतैःपादैःआकुलितत्वात्सादा कु
लकंनामजगत्प्रथितमित्यर्थः॥यथाप्रथमपादेत्रैवमात्रासमकवि
श्लोकचित्राणांलक्षणंद्वितीयेश्लोकेपचित्रयोस्ततीयेमात्रासमक
वानवासिकयोश्चतुर्थश्लोकेपचित्रयोरिति॥अथसर्वत्रलघुगु
रुप्रमाणमाह॥वृत्तस्यलाघिनावर्णैर्गावर्णागुरूभिस्तथा॥गुरुवोलै
र्लघुसंप्रमाणमितिनिश्चितं॥वृत्तस्यलाघवमात्रावर्णैर्ध्यानावृत्त
र्णसंख्यायान्यूनायासंख्यातसरिमितागुरुसंख्याज्ञेयाः॥यथात्रै
वप्रथमपादवृत्तस्यलाघिनावर्णैरितिचतुर्दशरूपमात्रासंख्यापा
दवर्णसंख्यायाष्टरूपयान्यूनीकृताषड्रूपाभवतितत्सरिमितागुर
वःसंतिषड्गुरवइतियावत्॥एवंसर्वत्रपद्यगद्येचज्ञेयं॥तथागुरूभि
र्ध्यानागुरुसंख्यायांअवशिष्टावर्णाःलघुसंख्याज्ञेयाः॥यथात्रैवाष्टाक्ष
रेपादेषड्गुरवइतिज्ञाते तदन्योद्वौलघूइतिपरिशेषाद्बुध्यते॥अथ

१५ वालघुज्ञातेषुपरिशेषाद्गुरवोज्ञेयाइत्याह॥गुरूवोलेऽन्तिश्लिष्टे॥लघु
र्भिन्नालघुसंख्याअवशिष्टायामात्रासंख्यातसंख्यायादलेऽर्द्ध
यासंख्यातसंख्याकागुरवोज्ञेयाः॥इतिगुरुलघुप्रमाणंनिरूपितं॥
यथात्रैवचतुर्दशमात्रासुद्वेलघूइतिज्ञातेद्विसंख्यातोवशि
ष्टायाद्वादशसंख्यायाअर्धसंख्याषट्तत्परिमितागुरवोइति
इतिमात्रासमप्रकरणं॥श्लिष्टेगुणितदशलघुरचितमपग
तलघुयुगलमपरमिदमाश्लिष्टं॥श्लिष्टेत्रिभिर्गुणिताद्दश
त्रिंशद्भवंतितत्रैर्लघुभिरचितं॥अपगतंलघुद्वयंयस्मिन्
ततूअष्टाविंशतिलघुसुकृमितिसूत्रार्थः॥एवंपूर्वार्धेलघुसंख्योक्ता॥
अथद्वितीयार्धेतामाह॥अपरमिति॥उत्तरार्धेतुअश्लिष्टंत्रै
र्लघुमुक्तं॥नतुपूर्वार्धेवदष्टाविंशतिलघुकं॥अधोभियो
रप्यर्धयोर्गुर्वंतताभाह॥सगुरूत्रकलयुगलक्रमपिसुप १५

रिघटितालक्षितपदसंचितिर्भवतिश्लिष्टा॥अर्द्धद्वयमपिअंतेगु
रुसहितंज्ञेयंसुपरिघटितालक्षितपदासंचितिःरचनात्रयथात
थासाश्लिष्टानाम॥अयंहिफलितोर्थः॥पूर्वार्धेऽष्टाविंशतिलघवोंतेगु
रुश्च॥उत्तरार्धेत्रिंशल्लघवोंतेगुरुश्चयस्यांसाश्लिष्टेति॥इयमेवपूर्वा
र्धोत्तरार्धयोर्वैपरीत्येनरचेजातिर्भवतीत्याह॥विनिमयविनिहितत्र
कलयुगलकलितपदसंचितिविरचितगुणनिचया॥श्लिष्टसुरव
दनेयमपिजगतिभिजश्लिष्टउपगतवतिसतिभवतिरचेजा॥विप
रीतार्धद्वयेनयुक्तपदरचनयाविरचितोगुणनिचयोयत्रेयम
पिश्लिष्टसुखकारिणी॥त्रिजकारेरचेजेसत्रजकारस्यश्लिष्टःप्रा
ग्देशमुपगतवतिसतिप्रासवतिसतियारचेजासारचेजेतिभवति
॥लक्ष्यानुरोधादेवमुक्तंरचेजेलक्ष्यमानेहिछंदोभंगःस्यात्॥यथो
क्तंमार्गे॥हिरण्यपूर्वंकरिणंप्रचक्षतइति॥अष्टावर्णागायत्र्या

स्तायस्याःसानंगक्रीडेक्ता॥ दलमपरमधिवसगुणितसलिलनिधि
लघुकविरचितपदयतिर्भवति॥ स्यात्सागुणिताषोडशाभव
ति॥ तस्यांमिता यस्याःपूर्वार्धेगुरवःउत्तरार्धंतुद्वात्रिंशल्लघुर्यक्तासा
नंगक्रीडानाम॥ चत्वारेसप्तगुणिताद्वात्रिंशद्भवंति॥ त्रिगुणानव
लघुरवसितिगुरुरितिदलयुगकलितनुरतिरुचिरा॥ इतिश्रीमद्
केदारविरचितेवृत्तरत्नाकरेद्वितीयोध्यायः॥२॥ त्रिगुणिता नव
सप्तविंशतिःतेलघवोयस्यांअवसितावसानेगुरुः॥ स्यातेभवे
त्किन्नु॥ इहार्धद्वयकलितनुर्यस्याःसारुचिरानाम॥ इतिश्रीमद्
गणेशदैवज्ञकुलतिलकायमानश्रीमदापाजीमट्टसूनुभास्करविर
चितेवृत्तरत्नाकरेसेतोद्वितीयोध्यायः॥२॥ द्वितीयेमात्राछंदो
विधायवर्णवृत्तानिविवक्षुस्तृतीयेसमवृत्तानि लक्षयन्नेका
क्षरजातिमधिकुरुते॥ उक्तायामिति॥ एकाक्षरपादेछंदसीय

१६

र्थः॥१॥ गुःश्रीः॥ यस्याएकगुरूरूपःपादःसाश्रीर्नाम यथा॥ श्रीरिः॥ पाया
त्॥ यद्यपिसमवृत्तान्यधिकारेगौस्त्रीत्यादिवत्सादेनैवश्रीछंदोलक्षयितुमु
चितंतथापिगुःश्रीरितिस्पष्टार्थमर्थोपादानं॥ यत्तुसुधादौलक्ष्यलक्ष
णयोरेकाक्षरेपादेनासंग्रहादर्थमुक्तमितिव्याख्यातं॥ तन्न॥ एश्रीरि
त्येकाक्षरेणापितयोःसंग्रहीतुंशक्यत्वात्॥ अस्मिन्नुक्तायां॥ द्व्यक्षरेपादे॥२॥
गौस्त्री॥ यस्याःपादेद्वौगुरूसास्त्रीनाम॥ यथा॥ श्रीमान्भानुः॥ मिसंसे
व्यः॥२॥ मध्यायांत्र्यक्षरे॥३॥ मोनारी॥ यस्याःपादेमऽऽऽगणः सानारी
नाम॥ यथा॥ नारीणांकल्याणी५मांपायात्सावाणी॥१॥ एवमुक्त
त्रस्वयमुदाहरणीयं॥ रोमृगी॥ यत्रराऽऽगणः सामृगीनाम॥ प्र
तिष्ठायां॥४॥ चतुरक्षरेपादे॥ मौचेत्कन्या॥ यत्रमऽऽऽगणएको
गुरुःसाकन्यानाम॥ सुप्रतिष्ठायां॥५॥ पंचाक्षरेपादे॥ मौगिति
पंक्तिः॥ यत्रभमऽऽगणास्तोद्वौगुरूसापंक्तिर्नाम॥ गायत्र्यां॥६॥

षडक्षरपादे॥ सौस्तत्तनुमध्या॥ यत्रतऽऽ।गणाय।ऽऽगणौसातनुमध्या
नाम॥ कृष्णिवदनान्यौ॥ यत्रन।।।गणाय।ऽऽगणौसाकृष्णिवदना नाम॥
सौचेद्वक्रमती॥ यत्रतऽऽ।गणस।।ऽगणौसावक्रमती नाम॥ विद्युल्लेखा
मोमः॥ यत्रद्वौमऽऽऽगणौसाविद्युल्लेखा नाम॥ उक्तिर्हि॥७॥ सप्ताक्षर
पादे॥ सौगस्यान्मदलेखा॥ यत्रमऽऽऽगणसगणौ॥ऽ एकोगुरुश्च
सामदलेखा नाम॥ कुमारललिता जस्तौगुः॥ जगणासगणगुरुभिः
कुमारललिता नाम॥ सरगैर्हंसमाला॥ सगणरगणगुरुभिर्हंसमा
ला नाम॥ अनुष्टुभि॥८॥ अष्टाक्षरपादे॥ भौगितिचित्रपदाः॥
भगणद्वयेनगुरुद्वयेनचचित्रपदा नाम॥ मोमोगोगोविद्युन्माला॥
मगणद्वयेनचगुरुद्वयेनचविद्युन्माला नाम॥ माणवकंभात्तलगाः॥
भगणतगणलघुगुरुभिर्माणवकं नाम॥ मौगौहंसरुतमेतत्॥ म
गणनगणगुरुद्वयेहंसरुतं नाम॥ जौसमानिकागलौच॥रगण

जगणगुरुलघुभिःसमानिका नाम॥ अत्रविषमपादस्यवर्णस्यगु
रुतैवेतिकविसमयप्रसिद्धिर्नावतरति॥ प्रमाणिका जरौलगौ॥
जगणरगणलघुगुरुभिःप्रमाणिका नाम॥ यितानमाभ्यांयद
न्यत्॥ समानिकाप्रमाणिकाभ्यांअन्यद्वितानं नाम॥ अत्रजग
णतगणगुरुद्वयंचास्तीतिताभ्यांभिन्नं॥ अन्यपादेनात्रलक्षित
छंदोतिरिक्तमनुष्टुप्युक्तमितिनेकविधमूह्यं॥ यत्तुस्कन्धेन जो
ह्नाविताननैंदवंपद्मप्रियेमनोरमयादिपद्यत्रयमुदाहृतं
तदसंगतं॥ नाराचकंतरौलगौ॥ इतितस्यलक्षितत्वात्॥ एतेनकंका
लमालभारिणंकंदर्पदर्पहारिणइत्यादिवृत्तिरुदाहृतंप्रत्युक्तं॥
यदपिकेचिदन्यदेतोह्यिताननमितिलक्ष्यलक्षणसंयुतंलक्षणमा
कुस्तदप्यसंगतं॥ चित्रपदालक्ष्यत्वात्॥ यदपिभट्टाः वयंतुगण्ही
मएततः॥ एतेषांयितानेतिग्रंथेनेकोगुरुर्द्वौलघूपनगुरुरित्यमे

१८ वसुनरितिक्रमविश्लिष्टस्याप्यनुष्टुप्छंदसोविताननंवदतामुक्ति
मुरीचक्रुस्तदपिन॥तस्यमाणवकलक्ष्यत्वात्॥आर्याम्यद्दि
सस्योक्तलक्षणनियमाभावोपलक्षणतयास्वयमप्यिष्यव्या
तत्वेनपूर्वग्रंथविरोधाच्च॥बृहसा॥९॥नवाक्षरपादे॥रान्न
साविहहलमुखी॥रगणनगणसगणैर्हलमुखीनाम॥भुज
गस्त्रिश्रुस्तानौमः॥नगणद्वयेनमगणेनचभुजगस्त्रिश्रुस्ता
नाम॥पंक्तौदशाक्षरपादे॥१०॥मूसौजौशुद्धधिराड्दमतं॥
मगणसगणाजगणगुरुभिःपणवंनामेतिप्राचः॥यस्तुतस्तु
जगणस्थानेयगणउचितः॥तथाचसूत्रं॥पणवोमोणोद्व
ति॥अतएवमूलेपिक्वचिद्वंपाठः॥मोयौचेतिपणवना
मेदमिति॥जौरगौमयूरसारिणीस्यात्॥रगणजगणरग
णगुरुभिर्मयूरसारिणीनाम॥भ्रौसगयुक्तोरुक्मवती १८

यं॥भगणमगणसगणगुरुभीरुक्मवतीनाम॥मत्ताज्ञेयाभसगयुक्ता॥
मगणभगणसगणगुरुभिर्मत्तानाम॥नरजगौर्भवेन्मनोरमा॥नगण
रगणजगणाश्चगुरुभिर्मनोरमानाम॥तूजौजोगुरुणेयमुपस्थिता॥तगणेन
जगणद्वयेनचगुरुणाउपस्थितानाम॥त्रिष्टुभिएकादशाक्षरपादे॥११॥
स्यादिंद्रवज्रायदितौजगौगः॥तगणद्वयेनजगणेनगुरुद्वयेनचेंद्रवज्रा
नाम॥उपेंद्रवज्राजतजास्ततोगौ॥जगणतगणजगणैर्गुरुद्वयेनच
उपेंद्रवज्रानाम॥अनंतरोदीरितलक्षमाजौपादौयदीयावुपजातयस्ताः॥
इत्थंकिलान्यास्वपिमिश्रितासुसमरंतिजात्यभिदमेवनाम॥इंद्रवज्रोपेंद्र
वज्रालक्षणसहितपादैर्युक्तौउपजातयोनाम॥एवंप्रकारेणअन्यास्विं
द्रवंशादिभिर्मिश्रितासुजातिषुइदमेवोपजातिरितिनामस्मरंति॥अ
योगवाहात्॥तत्रवंशस्थोपेंद्रवज्रामिश्रितायथावाल्मीकिरामायणेसुं
दरकांडे॥नमोस्तुवाचस्पतयेसचक्रिणेस्वयंभुवेचापिकुतोऽनाय॥
अनेनचोक्तंयदिदंममाग्रतोवनौकसातच्चतथास्तुनान्यथा॥१॥इंद्र

१९ वंशोपेंद्रवज्रावंशस्थमिश्रितायथा॥श्रीभागवते दशमस्कंधे॥तावत्सविष्ठा
स्वस्करोदरांतरेपरंनगीर्णःक्रोशःसवत्सः॥प्रतीक्ष्यमाणेनबकारिवेश्म
नंहतस्वकांतस्मरणेनरक्षसा॥१॥इंद्रवज्रेंद्रवंशोपेंद्रवज्रावंशस्थ
मिश्रितायथाप्रबोधचंद्रोदये॥विद्याप्रबोधोदयजन्मभूमिर्वाराणसी
मुक्तिपुरीनिरत्यया॥अतःकुलोचेदविधिंविधिस्फुनेवस्फुमत्रेछति
नित्यमेवसः॥१॥एवंप्रयोगवशादन्यदप्युदाहरणीयंएतेनसमा
क्षरजातिमिश्रिणएकोपजातिस्वमितिद्वयोरेवजातोमिश्रिणउप
जातिस्वमितिचव्याचक्षाणानांप्राचांग्रंथाअनादरणीयाः॥अत्रवृद्धः॥
इंद्रवज्रोपेंद्रवज्रामात्रलक्षणकपादेपजातिभेदसंख्यामाहुः॥ए
ककत्रपादेचरणद्वयेवापादत्रयेवान्यतरःस्थितश्चेत्॥तयोरिहान्य
त्रतदोहनीयाश्चतुर्दशोक्ताउपजातिभेदाः॥तयोरिंद्रवज्रोपेंद्रवज्र
योरन्यतरोभेदएकस्मिन्पादेद्वयोस्त्रिषुवास्यात्ततश्चतुर्दशोपजा
तयोभवंतियथा॥उइइइ१इउइइ२उउइइ३इइउइ४उइउइ५ १९

इउउइ६उउउइ७इइइउ८उइइउ९इउइउ१०उउइउ११इइउउ१२उइउ
उ१३इउउउ१४इतिएतासांक्रमेणनामान्यपिप्राक्तेपिंगलोक्तेदृश्ये॥यथा॥
कीर्तीवाणीमालासालाहंसीमाआजाआबाला॥अद्याभद्राबुद्धीताकृष्णामाइति॥
तत्राद्यायाःकीर्तेरुदाहरणं॥समानसीमेरुसखःपितृणांकन्यांकुलस्यस्थितये
स्थितिज्ञः॥मेनांमुनीनामपिमाननीयामात्मानुरूपांविधिनोपयेमे॥१॥एवं
वाण्याद्येरपिस्वयमुदाहरणंद्रष्टव्यं॥अनंतरोदीरितेतिमूलश्लोकस्थाई
व्याननवस्युपजातिः॥एकत्रपादेइतितुरीयाव्याख्यादृश्या॥नजजलगौग
दिताक्षमुखी॥नगणजगणाभ्यांसहितैर्जगणलघुगुरुभिःक्षमुखीनाम॥
दोधकवृत्तमिदंभभाभाद्गौ॥६॥भगणत्रयानुरूद्वयेनदोधकंनाम॥
अत्रभभभादितिसमाक्षरेद्वद्वइतिभद्वाः॥वक्तृतक्षद्वद्वविधेरनेकक्ष
वंताविषयलादत्रचातरंगेकदोषप्रसंगेनतदभावादप्रसंगःकथमन्य
थाकरावित्यादौनद्वद्वःतस्माद्वोत्तरोभोभस्तदुत्तरोभोभाभइक्तरं
पदलोपीसमासः॥६॥व्याख्यिक्तास्तोत्तरगोगाद्यिलोकैः॥मगणतगण

२० द्वयेनगुरुद्वयेनचद्रुतविलंबितनाम॥चतुर्भिःसप्तभिश्चयतिरितिवेदाः॥वातोर्मी
यंकथितातगौगः॥मगणभगणतगणेभ्योगुरुद्वयेनवातोर्मीतिज्ञेया॥भौन्लौ
गःस्याद्भमरविलसितं॥भभनलघुगुरुभिःभ्रमरविलसितंनाम॥रान्नरावि
रथोद्धतालगौ॥रगणान्नगणरगणलघुगुरुद्वयेनस्वागतानामभि
रथोद्धतानाम॥स्वागतेतिरनाद्गुरुयुग्मं॥रगणनगणभगणेभ्योगुरु
द्वयेनस्वागतानाम॥ननसगगुरचितावृत्ता॥नगणद्वयेनसगणेन
गुरुद्वयेनचवृत्तानामशालिनीवत्॥यतिः॥ननरलगुरुभिश्चभद्रिका॥
नगणाभ्यांरगणलघुगुरुभिश्चभद्रिकानाम॥स्येनिकारजोरलोगुरुर्य
दा॥रगणजगणरगणलघुगुरुभिःस्येनिकानाम॥मौक्तिकमालायदिभ त
नाद्गैः॥भनगणेभ्योगुरुद्वयेनमौक्तिकमालानाम॥पंचसप्तद्वादशचयतिः
संप्रदायात्॥उपस्थितमिदंजसौतादुकारौ॥जसतगणैर्गुरुद्वयेनचोप
स्थितंनाम॥पंचरसैःश्रीर्भतगनगैस्यात्॥भततगणैगुरुद्वयेनच
श्रीर्नामपंचभिःषड्भिश्चयतिः॥जगत्यांद्वादशाक्षरपादे॥१२॥चंद्रव २०

र्त्मनिगदंतिरनभसैः॥रनभसगणैश्चंद्रवर्त्मनाम॥जतौतुवंशस्थमुदीरितं
जरौ॥जतजरगणैर्वंशस्थंनाम॥स्याद्दिंद्रवंशाततजैरसंयुतैः॥तगणद्वये
नजगणरगणाभ्यांचेंद्रवंशानाम॥ततइतिनद्वंद्वः॥अपितूत्तरपदलो
पीसमासः॥ततोजत्रयेनद्वंद्वेततजाधितिद्विवचनांतमुचितं॥तृतीयाबहु
वचनांतपाठस्तुलेरवकप्रमादात्तश्चतजौचेतिविगृह्यद्वंद्वोत्तरपदगर्भ
द्वंद्वाद्वेतितत्वं॥इहतोटकमुद्बुद्धिसैःप्रथितं॥चतुर्भिःसगणैःस्तोटकंनाम॥
द्रुतविलंबितमाहनभौभरौ॥नभभरगणैर्द्रुतविलंबितंनाम॥वसुयुगवि
रतिर्नौम्यौ॥नगणद्वयेनमगणयगणाभ्यांचपुरोनामअष्टाभिश्चतुर्भि
श्चयतिः॥मयस्तुमुनिःशरेतिपाठंदृष्ट्वासप्तभिःपंचभिश्चयतिरिक्तया
द्रुतत्वंचेलं॥पुरोनौम्यौवसुसमुद्रइतिसूत्रविरोधात्॥प्रमुदितवदना
भवेन्नौचरौ॥नगणाभ्यांरगणाभ्यांचप्रमुदितवदनानाम॥नथसहि
तौन्यौकुसुमविचित्रा॥नयनयगणैःकुसुमविचित्रानामशरैर्जसजस
साजलोद्धतगतिः॥जसगणौत्तरौजसगणौयत्रसाजलोद्धतगतिः॥

रसाश्वरसाश्वेरेकतोषषड्भिः षड्भिर्यतिः॥८॥भुजंगप्रयातंभवैर्यैश्चतुर्भिः॥
चतुर्भिर्यगणैर्भुजंगप्रयातंनाम॥रैश्चतुर्भिर्युतास्त्रग्विणीसंमता॥चतुर्भि
रगणैःस्त्रग्विणीनाम॥युविभवैर्नाभजरैःप्रियंवदा॥नभजरगणैःप्रियंवदा
